रोल नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 8

028

228 (HHF)

# 2025

# संस्कृतम्

## (केवल प्रश्नपत्रम्)

**अवधि : होरात्रयम् ]** **[ पूर्णांक : 80**

**निर्देश :** (i) अस्मिन् प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।

(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन्नेव स्थाने लेखनीयानि।

(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।

(v) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(vi) खण्डसंख्या अपि लेखनीया।

### खण्ड - 'क' (अपठितांश-अवबोधनम्)

1. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

मातरः सर्वभूतानां, गावः सर्वसुखप्रदाः' उक्त कथनं गो श्रेष्ठतां प्रतिपादयति। वस्तुतस्तु गौः अस्माकं माता अस्ति। यतः गौः स्वामृतोपमेन दुग्धेन मातृवत् अस्मान् पालयति। गौराकृतिः अति सरला मनोहरा च भवति। गोमूत्रपानेन उदररोगाः नश्यन्ति। अस्माभिः गोपालनं गोरक्षणम् च कर्त्तव्यम्। उक्तं च- 'गावो ममाग्रतः सन्तु, गावो मे सन्तु पृष्ठतः'।

(क) एकपदेन उत्तरत – 1×2=2

(i) सर्वसुखप्रदाः काः?

(ii) गौः कीदृशेन दुग्धेन अस्मान् पालयति?

(ख) पूर्णवाक्येन उत्तरत- 1

(i) सर्वभूतानां मातरः काः प्रोक्ताः?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) 'गौः' इत्यस्य शब्दस्य एकं पर्यायशब्दं लिखत।

(ii) 'गौराकृतिः' इत्यस्मिन् शब्दे सन्धि-विच्छेदं कुरूत।

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

प्रदूषणसमस्यायाः विषये अद्य सम्पूर्णः विश्वः चिन्तातुरः अस्ति। संयुक्तराष्ट्रसंघेन अपि अस्मिन् विषये चिन्ता प्रकटिता। प्रदूषणनिवारणस्य उपायेषु 'वृक्षारोपणं' सर्वोत्कृष्टं मतम्। प्रदूषण समस्या तदैव उपस्थिता यदा मानवेन स्वार्थसिद्धये वृक्षकर्तनम् आरब्धम्। प्रकृतौ सन्तुलनस्थापनार्थं वृक्षरक्षणं वृक्षारोपणं च आवश्यकम्। इदं सन्तुलनम् एव भूक्षरणात् अतिवृष्टेः अनावृष्टेः च रक्षितुं समर्थम्। धूमानां विषाक्तवायूनां च शोषणस्य सामर्थ्यं वृक्षेषु एव, येन वातावरणं शुद्धं पवित्रं च भवति। किं बहुना नष्टप्रायाणां पशुपक्षिणां जातीनां च रक्षा अपि अनेनैव सम्भवा। श्रीमद्भागवते अपि भगवान् कृष्णः वृक्षाणां महत्वं बलरामं प्रति निवेदितवान्।

(क) एकपदेन उत्तरत - 1×2=2

(i) कस्याः विषये विश्वः चिन्तातुरः अस्ति?

(ii) श्रीकृष्णः वृक्षाणां महत्वं कं प्रति निवेदितवान्?

(ख) पूर्णवाक्येन उत्तरत - 1×2=2

(i) संयुक्तराष्ट्रसंघेन कस्मिन् विषये चिन्ता प्रकटिता?

(ii) वृक्षारोपणेन का सम्भवा?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) 'विषाक्त वायूनां' अत्र विशेषणपदं किम्?

(ii) 'अखिल' इत्यर्थे किं पदम् अत्र प्रयुक्तम्?

(घ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 1

## खण्ड - 'ख' (रचनात्मकं लेखनम्)

3. निजभगिन्याः विवाहे प्रतिभागार्थं अधोलिखिते प्रधानाचार्यं प्रति अवकाशपत्रे रिक्त स्थानानि मञ्जूषायां प्रदत्तपदानां पूरयत। 1×4=4

सेवायाम्

प्रधानाचार्यः महोदयः

राजकीयः सर्वोदयः विद्यालयः सिकडानी।

श्रीमान्

सविनयं --------- इदमस्ति यत् अहं भवतः विद्यालये द्वादशम् --------- छात्रोऽस्मि।--------- मम भगिन्याः विवाहः अस्ति। अतः अहम् अद्य विद्यालयम् आगन्तुं न शक्नोमि। कृपया माम् --------- अवकाशं स्वीकृत्य अनुग्रहीष्यन्ति भवन्तः।

भवतः आज्ञाकारी शिष्यः

गौरिकवर्धनः

| **मञ्जूषा** - एकदिवसस्य, अद्य, निवेदनम् कक्षायाः |
|---|

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नांकितं संवादं पूरयित्वा लिखत – 1×4=4

भूवत्सला – सुखदा ! वयं ------------- पठामः।

सुखदा – भूवत्सले ! अस्माकं ------------- संस्कृताश्रिता।

भूवत्सला – आम् ! ------------- एव वयम् अस्माकं संस्कृतिं जानीमः।

सुखदा – अपि च संस्कृतभाषा मधुरतमा------------- अस्ति।

| **मञ्जूषा** – सरला च, संस्कृतिः, संस्कृतेन, संस्कृतं। |
|---|

5. 'मम शिक्षकः' इति विषयम् अधिकृत्य निम्नांकितशब्दसूचीतः शब्दान् चित्वा चत्वारि वाक्यानि लिखत- 2×4=8

| **मञ्जूषा** – विद्वानं, शिक्षकः, अतीव, प्रेमपूर्वकम्, लोकप्रियः। |
|---|

## खण्ड - 'ग' (अनुप्रयुक्त व्याकरणम्)

6. अधोलिखितेषु रेखाङ्कितपदेषु सन्धिं / सन्धि - विच्छेदं प्रदत्त विकल्पेभ्यः उचितं विकल्पं चित्वा लिखत - 1×3=3

(क) रामोऽहं व्याकुलात्मा।
- (i) रामम् + अहं
- (ii) रामस्य + अहं
- (iii) रामो + अहं
- (iv) रामे + अहं

(ख) गृह + अभिमुखाः सर्वेछात्राः।
- (i) गृहभिमुखाः
- (ii) गृहाभिमुखाः
- (iii) गृघाभिमुखाः
- (iv) गृभिमुखाः

(ग) अतीव सुन्दरमिदं भवनम्।
- (i) भव + नम्
- (ii) भव् + अम्
- (iii) भो + अनम्
- (iv) भौ + अनम्

7. अधोलिखितेषु रेखाङ्कितपदेषु समासं / समास विग्रहं प्रदत्त विकल्पेभ्यः उचितं विकल्पं चित्वा लिखत - 1×3=3

(क) रामः यथाशक्तिः दानं ददाति।
- (i) यथायाः शक्तिः
- (ii) यथायां शक्तिम्
- (iii) शक्तिं अनतिक्रम्य
- (iv) शक्तिः चासौ यथा

(ख) नीलकण्ठः हिमालये वसति।
- (i) नीलः कण्ठः यस्य सः
- (ii) कण्ठे नीले च
- (iii) नीलस्य कण्ठम्
- (iv) भगवान् शिवः

(ग) राज्ञः पुरुषः तत्र तिष्ठति -

(i) सेवकः (ii) भृत्यः

(iii) राजपुरुषः (iv) रजपुरुषः

8. अधोलिखितेषु रेखाङ्कितपदेषु प्रकृति प्रत्ययौ संयोज्य प्रदत्तविकल्पेभ्यः चित्वा शुद्धं विकल्पं लिखत- 1×3=3

(क) युष्मासु ज्येष्ठ+टाप् का अस्ति।

(i) ज्येष्ठटाप् (ii) ज्येष्ठ

(iii) ज्येष्ठा (iv) ज्यष्ठा

(ख) त्वया कुमार्गः त्यज् + अनीयर्।

(i) त्यजनीयरः (ii) त्याज्यः

(iii) त्यजनीयाम् (iv) त्यजनीयः

(ग) तस्य भार्या विद्वस्+ङीप् अस्ति।

(i) विद्वान् (ii) विदुषी

(iii) विदुसी (iv) विदुशी

9. मञ्जूषायाः सहायतया निम्नलिखितानि वाक्यानि अव्ययशब्दैः पूरयित्वा लिखत- 1×3=3

| **मञ्जूषा** – विना, कदापि, भृशम् |
|---|

(क) असत्यं ----------- न वाच्यम्।

(ख) अस्माकं पर्यावरणं --------- प्रदूषितमस्ति।

(ग) विद्यया ---------- सुखं नास्ति।

10. अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत- 1×3=3


(क) अहं पुस्तकं ददामि।

(ख) त्वया भोजनं क्रियते।

(ग) अहं तिष्ठामि।

11. घटिकां दृष्ट्वा संस्कृत पदेषु समयं पूरयित्वा वाक्यानि उत्तरपुस्तिकायां लिखत- 1×4=4

(क) (ख) (ग) (घ)



(क) सः प्रातः ----------- वादने व्यायामं करोति।

(ख) सः -------- वादने विद्यालयं गच्छति।

(ग) सः --------- वादने गृहम् आगच्छति।

(घ) गौरिकवर्धनः सायं ------------ वादने उद्याने क्रीडति।

12. अधोलिखितयोः वाक्ययोः अङ्कानां स्थाने संख्यावाचक विशेषणैः रिक्तस्थानपूर्तिः संस्कृतेन कृत्वा पुनः उत्तर पुस्तिकायां लिखत – 1×2=2

(क) अस्माकं ग्रामे (85) -------- कृषकाः सन्ति।

(ख) वाटिकायां (54) ------- गन्ध कुसुमानि सन्ति।

13. अधोलिखितेषु वाक्येषु रेखांकितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यं उत्तरपुस्तिकायां लिखत– 1×3=3

(क) वृक्षे <u>चतस्रः</u> फलानि सन्ति।

(ख) ते अद्य भोजनं <u>करिष्यावः</u>।

(ग) <u>अयं</u> फलं अतीव सुन्दरम् अस्ति।

**खण्ड - 'घ' (पठित अवबोधनम्)**

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान प्रश्नान् उत्तरत -

एकः सिंहः सुखेन विश्राम्यति तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः। तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति एवमेव वानराः वारं वारं सिंहं तुदन्ति। क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति। वानराः हसन्ति वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्टवा हर्षमिश्रितं कलरवं कुर्वन्ति।

(क) एकपदेन उत्तरत– 1

(i) कः सुखेन विश्राम्यति?

(ख) पूर्णवाक्येन उत्तरत– 1×2=2

(i) क्रुद्धः सिंहः किम् इच्छति?

(ii) सिंहस्य दशां दृष्टवा पक्षिणः किं कुर्वन्ति?

(ग) निर्देशानुसारम् उत्तरत– 1×2=2

(i) 'पक्षिणः' अस्य पदस्य विशेषणपदं किं प्रयुक्तम्?

(ii) 'समर्थः' अस्य विलोमपदं गद्यांशात् चिनुत।

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत–

मृगा मृगैः सङ्गमनुव्रजन्ति,
गावश्च गोभिः तुरगास्तुरङ्गैः।
मुर्खाश्च मूर्खैः सुधियः सुधीभिः,
समान-शील-व्यसनेषु सख्यम्।।

(क) एकपदेन उत्तरत- 1

(i) सुधियः सख्यं केन सह भवति?

(ख) पूर्णवाक्येन उत्तरत- 1×2=2

(i) के कैः सङ्गम् अनुव्रजन्ति?

(ii) सख्यं केषु भवति?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) 'सुधियः' इत्यस्य अत्र प्रयुक्तं विलोमपदं किम्?

(ii) 'मैत्री' इत्यस्य अत्र कः पर्यायः?

16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत -

रामः – (स्वगतम्) धिङ् मामेवंभूतम्। सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भर्त्सयति (सवाष्पमवलोकयति)

रामः – अतिदीर्घः प्रवासोऽयं दारुणश्च। (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि। न युक्तं च स्त्रीगतमनुयोक्तुम्, विशेषतस्तपोवने। तत् कोऽत्राभ्युपायः?

विदूषकः – (जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी?

लवः – तस्याः द्वे नामनी।

विदूषकः – कथमिव?

लवः – तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।

रामः – अपि च इतस्तावद् वयस्य! मुहूर्तमात्रम्।

विदूषकः – (उपसृत्य) आज्ञापयतु भवान्।

रामः – अपि कुमारयोनयोरस्माकं च सर्वथा समरूपः कुटुम्बवृत्तान्तः?

(क) एकपदेन उत्तरत- 1

(i) कस्याः द्वे नामनी?

(ख) पूर्णवाक्येन उत्तरत- 1×2=2

(i) तपोवनवासिनो देवीति नाम्नाह्वयन्ति?

(ii) केषां सर्वथा समरूपः कुटुम्बवृतान्तः।

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) 'कुतूहलेनाविष्टो' पदे सन्धिविच्छेदं कुरुत।

(ii) 'अतिदीर्घः प्रवासोऽयम्' पदेऽस्मिन् 'प्रवासः' पदस्य विशेषणपदं लिखत।

17. अधोलिखितयोः श्लोकयोः भावार्थं उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत -

(क) विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम् ।

अश्वश्चेद् धावने वीरः भारस्य वहने खरः।। ½×4=2

**भावार्थ :–**

अस्मिन् विचित्र संसारे ......... व्यर्थं नास्ति । धावने यदि ............... वीरः मन्यते तथैव ...........वहने ...............वीरः अस्ति।

(ख) एकः एव खगो मानी वने वसति चातकः।

पिपासितो वा म्रियते याचते वा पुरन्दरम्।। ½×4=2

**भावार्थ :–**

कानने एकः एव स्वाभिमानी पक्षीः --------- वसति। यः पिपासितः एव ------- परन्तु स्वाभिमानं त्यक्त्वा पृथिव्याः जलं न गृहणाति। एवमेव स्वाभिमानी पुरुषः --------- न त्यजति, मृत्युं वा --------।

18. अधोलिखितयोः श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत-

(क) पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्। ½×2=1
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।।

**अन्वय :-**

पिता--------- बाल्ये महत् विद्या धनं यच्छति, अस्य पिता किं तपः तेपे इत्युक्तिः --------।

(ख) संपत्तौ च विपत्तौ च महतामेकरूपता।। ½×2=1
उदये सविता रक्तो रक्तश्चास्तमये तथा।

**अन्वय :-**

महताम् संपत्तौ विपत्तौ च -------- (भवति)। (यथा) सविता --------- रक्तः (भवति) तथैव अस्तमये च रक्तः भवति।

19. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तरपुस्तिकायां लिखत – ½×4=2

(क) व्याघ्रं दृष्ट्वा धूर्तः श्रृगालः अवदत्।

(ख) त्वम् मानुषात् विभेषि।

(ग) आलस्यं मनुष्याणां शत्रुः।

(घ) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः।

20. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोज्य पुनः उत्तरपुस्तिकायां लिखत- ½×6=3

(i) अगृहणाच्च, परं विचित्रमघटत्।

(ii) तत्रनिहितामेकां मञ्जूषाम् आदाय पलायितः।

(iii) रात्रौ कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।

(iv) चौरः एव उच्चै क्रोशितुमारभत।

(v) चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत्।

(vi) विचित्रा दैवगतिः।

21. अधोलिखितयोः शब्दयोः संस्कृतेन वाक्यप्रयोगं कुरुत- 1×2=2

(क) महानगरेषु

(ख) पाठं

*****